2 Copies

Babubanarasi Prasad

Singhabyaghra sahilā mathuri pancha lakshani

सिंह व्याघ्र सहित माथुरी पंचलक्षणी

Sanskrit

Paper – Printed

1941 Sambat (134 years old)

12.5" X 4.8"

8 Folio

Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०४५ नं ४५

128

अथसिंहव्याघ्रसहितामाधुरीपंचलक्षणीप्रारभ्यते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म॰ श्रीगणेशायनमः॥ अनुमानप्रामाण्यंनिरूप्यव्याप्तिस्वरूपनिरूपणमारभते॥ नन्वित्यादिना॥ अनुमितिरित्यस्यानुमाननिष्ठप्रामाण्यानुमि
१ तिरित्यर्थः व्याप्तिज्ञानइत्यत्रचविषयत्वंसप्तम्यर्थः तथाचानुमाननिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयीभूताव्याप्तिःकेत्यर्थः अनुमान
निष्ठप्रामाण्यानुमितिहेतुत्वस्यनेनव्याप्तेरनुमानप्रामाण्योपपादकत्वकथनादनुमानप्रामाण्यनिरूपणानन्तरंव्याप्तिनिरूपणेउपोद्घातएव
संगतिरितिसूचितमित्याहुः उपपादकत्वंचात्रज्ञापकत्वंकेचित्तुअनुमितिपदमनुमितिनिष्ठेतरभेदानुमितिपरम्॥ तथाचानुमितिनिष्ठभेदा
नुमितौयोहेतुःप्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वरूपः तद्घटकंयद्व्याप्तिज्ञानंतदंशेविशेषणीभूताव्याप्तिःकेत्यर्थः घटकत्वा
र्थकसप्तमीतत्पुरुषसमासात्॥ तथाचप्रागुक्तानुमितिलक्षणेउपोद्घातएवसंगतिरत्रसूचितेत्याहुः॥ नतावदिति॥ अव्यभिचरितत्वमव्यभिच

श्रीगणेशायनमः॥ नन्वनुमितिहेतुव्याप्तिज्ञानेकाव्याप्तिः नतावदव्यभिचरितत्वम्॥ तद्धिनसाध्याभाववदवृत्तित्वम्॥ साध्यवद्भि
न्नसाध्याभाववदवृत्तित्वम्॥

रितत्वशब्दप्रतिपाद्यंतत्रहेतुमाह॥ तद्धीतिहियस्मात्तदव्यभिचरितत्वंनेतिसर्वत्रसंबध्यते तथाचव्याप्ति
र्यतःसाध्याभाववदवृत्तित्वादिरूपाभिचरितत्वशब्दप्रतिपाद्यस्वरूपानअतोऽव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपानेत्यर्थः पर्यवसितः॥ विशेषा
भावकूटस्यसामान्याभावहेतुताप्रसिद्धैवेतिननञ्द्वयोपादानमनर्थकमितिविभावनीयम्॥ साध्याभाववदवृत्तित्वमिति॥ वृत्तंवृत्तिर्भावेनिष्ठा
प्रत्ययात्॥ वृत्तस्याभावोऽवृत्तं॥ वृत्त्यभावइतियावत् साध्याभाववतोऽवृत्तंसाध्याभाववदवृत्तं तद्यत्रास्तितत्साध्याभाववदवृत्ति मत्वर्थीयेनप्र
त्ययात् तस्यभावःसाध्याभाववदवृत्तित्वम्॥ तथाचसाध्याभाववदवृत्त्यभाववत्त्वमितिफलितोऽर्थइतिप्राञ्चः तदसत्नञ्कर्मधारयःस्यान्मत्वर्थीयोबहुव्री रामः
हिश्चेत्तदर्थप्रतिपत्तिकरइत्यनुशासनविरोधात्॥ तत्रकर्मधारयपदस्यबहुव्रीहीतरसमासपरत्वात्तच्चागुणवत्त्वमितिसाधर्म्यव्याख्यानावसरेगुण १

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकाशरहस्येदीधितिरहस्येचस्फुटम्॥ अव्ययीभावसमासोत्तरपदार्थेनसमंतत्समासानिविष्टपदार्थान्तरान्वयस्याव्युत्पन्नत्वात्॥ भूतलीय
कुम्भं॥ भूतलाघटमित्यादौचभूतलवृत्तिघटसमीपतदत्यन्ताभावयोरप्रतीतेः एतेनवृत्तेरभावोऽवृत्तीत्यव्ययीभावानन्तरं साध्याभाववतोऽवृत्ति
र्यत्रेतिबहुव्रीहिरित्यादिप्रत्युक्तम्॥ वृत्तौसाध्याभाववतोऽन्वयानुपपत्तेः अव्ययीभावसमासस्यापिअव्ययतयातेनसमंसमासान्तरासम्भवाच्चनञ्
उपाध्यादिरूपाव्ययविशेषाणामेवसमस्यमानत्वेनपरिगणितत्वात्॥ वस्तुतस्तुसाध्याभाववतोनवृत्तिर्यत्रेतित्रिपदव्यधिकरणबहुव्रीहिणुक्त
त्वप्रत्ययःसाध्याभाववतद्वृत्त्यत्रनिरूपितत्वंषष्ठ्यर्थः अन्वयश्चास्यवृत्तौ॥ तथाचसाध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वमव्यभिचरितत्व
मितिफलितम् नचव्यधिकरणबहुव्रीहिश्चनसर्वत्रसाधुरितिवाच्यम् अयंहेतुःसाध्याभाववदवृत्तिरित्यादौव्यधिकरणबहुव्रीहिंविनागत्यन्त

साध्यवत्प्रतियोगिताकान्योन्याभावासामानाधिकरण्यंसकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्॥ साध्यवदन्यावृत्तित्व
म्वाकेवलान्वयिन्यभावात्॥ इतिचिंतामणौ॥

राभावेनात्रापिव्यधिकरणबहुव्रीहेस्साधुत्वात् साध्याभावाधिकरणवृत्त्यभावश्चतादृ
शवृत्तित्वसामान्याभावोबोध्यः तेनधूमवान्वह्नेरित्यादौधूमाभाववज्जलह्रदादिवृत्त्यभावस्यधूमाभाववद्वृत्तित्वजलत्वोभयत्वाद्यवच्छिन्ना
भावस्यचवन्हेःसत्वेपिनातिव्याप्तिः साध्याभाववद्वृत्तिश्चहेतुतावच्छेदकसम्बन्धेनविवक्षणीयातेनवह्न्याभाववतिधूमावयवेजलह्रदादौ
समवायकालिकविशेषणतादिनाधूमस्यवृत्तावपिनक्षतिः साध्याभावःसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियो
गिताकोबोध्यः तेनवन्हिमान्धूमादित्यादौसमवायादिसम्बन्धेनवह्निसामान्याभाववतिसंयोगसंबन्धेनतत्तद्वन्हित्ववन्हिजलोभयत्वावच्छि
न्नाभाववतिचपर्वतादौसंयोगेनधूमस्यवृत्तावपिनक्षतिः ननुतथापिगुणत्ववान्ज्ञानत्वात्॥ सत्तावान्जातेरित्यादौविषयित्वाव्याप्यत्वादिसम्ब

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म॰ न्धेनतादृशसाध्याभाववृत्तिज्ञानादौज्ञानत्वजात्यादेर्वर्त्तमानत्वादव्याप्तिः नचसाध्याभावाधिकरणत्वमभावीयविशेषणताविशेषेणविवक्षितमिति
२ वाच्यम्॥तथासतिघटत्वात्यन्ताभाववान्घटान्योन्याभाववान्पटत्वादित्यादौसाध्याभावस्यघटत्वादेर्विशेषणताविशेषत्वसम्बन्धेनाधिकरणाप्र
सिद्ध्याऽव्याप्तिरितिचेन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनसाध्या
भावाधिकरणत्वस्यविवक्षितत्वात्॥इत्यन्तप्रतियोगिताविशेषणं॥तादृशसंबंधश्चवन्हिमान्धूमादित्यादिभावसाध्यकस्थलेविशेषणताविशेषएव
॥घटत्वात्यन्ताभाववान्पटत्वादित्यादिअभावसाध्यकस्थलेतुसमवायादिरेव॥समवायविषयित्वादिसम्बन्धेनप्रमेयादिसाध्यकेज्ञानत्वादिहेतौसाध्य
तावच्छेदकसमवायादिसम्बन्धावच्छिन्नप्रमेयाद्यभावस्यकालिकादिसम्बन्धेनयोऽभावःसोपिप्रमेयतयासाध्यान्तर्गतःतदीयप्रतियोगिताव
च्छेदककालिकादिसंबन्धेनसाध्याभावाधिकरणेज्ञानत्वादेर्वृत्तेरव्याप्तिवारणायसामान्यपदोपादानम्॥साध्यसामान्यीयत्वंच यावत्साध्यनिरूपि
तत्वंसानिरूपकसाध्यकभिन्नत्वमितियावत्॥अस्यैकोक्तिमात्रपरतयागौरवस्यादोषत्वात्कारणतावच्छेदकेचभावसाध्यकस्थलेअभावीयविशेष
णताविशेषेणसाध्याभावाधिकरणत्वमभावसाध्यकस्थलेचयथायथंसमवायादिसम्बन्धेनसाध्याभावाधिकरणत्वमुपादेयम्॥साध्यसाधनभेदेनका
र्यकारणभावभेदात् नचतथापिघटान्योन्याभाववान्पटत्वादित्यादावन्योन्याभावसाध्यकस्थलेघटत्वादिरूपेसाध्याभावेनसाध्यप्रतियोगित्वंनवासम
वायादिसंबंधस्तदवच्छेदकः तादात्म्यस्यैवतदवच्छेदकत्वादित्यव्याप्तिस्तदवस्थेतिवाच्यम्॥अत्यन्ताभावाभावस्यप्रतियोगिरूपत्वेनघटभेदस्यघ
टभेदात्यन्ताभावत्वावच्छिन्नाभावरूपतयाघटभेदात्यन्ता भावरूपस्यप्रतियोगितावच्छेदकीभूतघटत्वस्यापिसमवायसम्बन्धेनघटभेदप्रतियोगि
त्वात्॥नचान्यत्रात्यन्ताभावाभावस्यप्रतियोगिरूपत्वेपिघटभेदात्यन्ताभावाभावोनघटादिभेदरूपः॥किन्तुप्रतियोगितावच्छेदकीभूतघटत्वात्यन्ता राम:
भावरूपएवेतिसिद्धान्त इतिवाच्यम्॥यथाहिघटत्वावच्छिन्नघटवत्ताग्रहेघटात्यन्ताभावाग्रहाद्घटात्यन्ताभावाभावव्यवहाराच्चघटात्यन्ताभावाभावो २

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

घटरूपत्वतया घटभेदत्वताग्रहे घटभेदात्यन्ताभावाग्रहात् घटभेदात्यन्ताभावाभावव्यवहाराच्च घटभेद एव तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताका
भाववृत्तिताहशसिद्धान्तो न युक्तिसहः विनिगमकाभावेनापि घटत्वत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववद्घटभेदस्यापि घटभेदात्यन्ताभावाभाव
त्वसिद्धेरप्रत्यूहत्वाच्चात एव ताहशसिद्धान्तो नोपाध्यायसंमतः अत एव अभावविरहात्मत्वं वस्तुनः प्रतियोगितेत्याचार्य्याः अन्यथा घटभेदात्य
न्ताभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्त्यापत्तेः नवान्योन्याभावप्रतियोगितावच्छेदके तल्लक्षणस्यातिव्याप्त्यापत्तिः इष्टापत्तेः न चैवं घटत्वत्वा
वच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वापत्तिरिति वाच्यम्॥ तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव
तत्स्वरूपत्वाभ्युपगमात् तद्रूपताग्रहे ताहशतदत्यन्ताभावाभावस्यैव व्यवहारात् उपाध्यायैर्घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ता
भावस्यापि घटभेदस्वरूपत्वाभ्युपगमाच्च न चैवं साध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेनैव साध्याभावाधिकरणत्वं विवक्ष्यतां किं सा
ध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तित्वस्य प्रतियोगिताविशेषणत्वेनेति वाच्यम् कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमावि
शेष्यत्वाभावस्य विशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः कालिकसंबंधावच्छिन्नसाध्याभावस्य विशेषणताविशेषसंबन्धे
नयोः भावस्तस्यापि साध्यरूपतया कालिकसम्बन्धवद्विशेषणताविशेषोपि साध्यीयप्रतियोगितावच्छेदकसम्बन्धस्तेन सम्बन्धेनात्मत्वप्रकार
कप्रमाविशेष्यत्वरूपसाध्याभाववत्यात्मनि हेतोरात्मत्वस्य वृत्तेः प्रतियोगितावच्छेदकवत्प्रतियोग्यपि अन्योन्याभावाभावस्तेन तादात्म्यसंबन्धे
न साध्यतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यीयप्रतियोगित्वस्याप्रसिद्धिः इत्थं चात्यन्ताभावत्वनिरूपितत्वेनापि साध्य
सामान्यीयप्रतियोगिताविशेषणीया अन्यथा घटान्योन्याभाववान् घटवत्वादित्यादावव्याप्त्यापत्तेः तादात्म्यसम्बन्धस्यापि निरुक्तसाध्याभाववृत्तिसा
ध्यीयप्रतियोगितावच्छेदकत्वात् पट्टसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयनिरुक्तप्रतियोगित्वतदवच्छेदकत्वान्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म. ३ तरावच्छेदकसंबंधेनैव साध्याभावाधिकरणत्वं विवक्षणीयम्॥ वृत्यन्तमन्यतरविशेषणम्॥ एवं च घटान्योन्याभाववान् पटत्वादित्यादौ साध्याभाव
स्यघटत्वादेः साध्यप्रतियोगित्वविरहेपि न क्षतिः तादृशान्यतरस्य प्रतियोगितावच्छेदकत्वस्यैव तत्र सत्वात् न च तथापि कपिसंयोगी एतद्वृक्षत्वा
दित्याद्यव्याप्यवृत्तिसाध्यके सद्धेतावव्याप्तिरिति वाच्यम्॥ निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या निरुक्तसंसर्गकनिरवच्छिन्नाधिकरणता त
दाश्रयावृत्तित्वस्य विवक्षितत्वात्॥ गुणकर्मान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ सत्तात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृत्तित्वेपि सा
ध्याभावत्वविशिष्टनिरूपिताधिकरणत्वस्य गुणाद्यवृत्तित्वान्नाव्याप्तिः न चैवं कपिसंयोगाभाववान् सत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरण
त्वाप्रसिध्याऽव्याप्तिरिति वाच्यम्॥ केवलान्वयिन्यभावादित्यनेन ग्रन्थकृतैवास्य दोषस्य वक्ष्यमाणत्वात् न च तथापि कपिसंयोगिभिन्नं गुणत्वादित्या
दौ निरवच्छिन्नसाध्याभावाधिकरणत्वाऽप्रसिध्याऽव्याप्तिः अन्योन्याभावस्याव्याप्यवृत्तितानियमवादिनये तस्य केवलान्वय्यनन्तर्गतत्वादिति वाच्य
म् अन्योन्याभावस्याव्याप्यवृत्तितानियमवादिनये अन्योन्याभावात्यन्ताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेपि अव्याप्यवृत्तिमदन्योन्याभावा
भावस्याव्याप्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपगमात् तच्चाग्रे स्फुटीभविष्यति॥ ननु तथापि समवायादिना गगनादिहेतुके इदं वह्निमद्गगनादित्या
दावतिव्याप्तिः वह्न्यभाववति हेतुतावच्छेदकसमवायादिसम्बन्धेन गगनादेरवृत्तेः न च तल्लक्ष्यमेव हेतुतावच्छेदकसम्बन्धेन पक्षधर्मत्वाभावा
च्चासद्धेतुत्वव्यवहार इति वाच्यम्॥ तत्रापि व्याप्तिभ्रमेणैवानुमितेरनुभवसिद्धत्वादन्यथा धूमवान्वह्नेरित्यादेरपि लक्ष्यस्य सुवचत्वात्॥ एवं द्रव्यं गु
णकर्मान्यत्वविशिष्टसत्त्वादित्यादावप्यव्याप्त्यापत्तिः विशिष्टसत्वस्य केवलसत्तानतिरेकितया द्रव्यत्वाभाववत्यपि गुणादौ तस्य वृत्तेः गुणे गुणकर्मा
न्यत्वविशिष्टसत्तेति प्रतीतेस्सर्वसिद्धत्वात्॥ सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च॥ सत्ताभाववति सामान्यादौ हेतुतावच्छेदकसमवायसम्बन्धेन वृ रा.म.
त्तेरप्रसिद्धेरिति चेन्न हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणताप्रतियोगिकहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेष ३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संबन्धेननिरुक्तसाध्याभावत्वविशिष्टनिरूपितनिरुक्तसंसर्गकनिरवच्छिन्नाधिकरणताश्रयवृत्तित्वसामान्याभावस्यविवक्षितत्वात्॥ वृत्तिश्च
नहेतुतावच्छेदकसंबंधेनविवक्षणीयाअस्तिचसत्तावान्द्रव्यत्वादित्यादौसत्ताभावाधिकरणतावद्वृत्तेर्हेतुतावच्छेदकसमवायसम्बन्धाव
च्छिन्नाधेयतानिरूपितविशेषणताविशेषसंम्बन्धेनसामान्याभावोद्रव्यत्वादौहेतुतावच्छेदकसमवायसंबन्धावच्छिन्नाधेयतानिरूपितवि
शेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावाधिकरणतावद्वृत्तित्वाभावस्यअधिकरणसम्बन्धावच्छिन्नाभावत्वेयासंयोगसंबन्धा
वच्छिन्नगुणाभावादेरिवकेवलान्वयित्वात्॥ द्रव्यंसत्वादित्यादौचद्रव्यत्वाभावाधिकरणगुणादिवृत्तित्वस्यैवसमवायावच्छिन्नाधेयतानिरूपितवि
शेषणतासम्बन्धेनसत्तायांसत्वान्नातिव्याप्तिः द्रव्यंविशिष्टसत्वादित्यादावव्याप्तेर्वारणायप्रतियोगिकान्तमाधेयताविशेषणम्॥ वस्तुतस्त्वेतल्ल
क्षणकर्त्तृनयेविशिष्टसत्वंविशिष्टनिरूपिताधारतासम्बन्धेनैवद्रव्यत्वव्याप्यंनतुसमवायसम्बन्धेनतथाचप्रतियोगिकान्तमाधेयताविशेषण
मनुपादेयमेव॥ ॥तदुपादानेहेतुतावच्छेदकभेदेनकार्य्यकारणभावभेदापत्तेः हेतुतावच्छेदकसम्बन्धेनसम्बन्धित्वेसतीत्यनेनापिविशेषणी
यत्वाद्वह्निमान्गगनादित्यादौनातिव्याप्तिः॥ ननुतथाप्युभयत्वमुभयत्रैवपर्याप्तंनत्वेकत्रेतिसिद्धान्तादरेघटत्ववान्घटपटोभयत्वादित्यादौपर्य्याप्त्या
त्मकसम्बन्धेनोभयत्वहेतुकेऽतिव्याप्तिः घटत्वाभाववतिहेतुतावच्छेदकसंबन्धेनहेतोरवृत्तेः घटोनघटपटोभयमितिवसदेनघटपटोभयमिति
प्रतीतेरितिचेन्नतादृशसिद्धान्तादरेहेतुतावच्छेदकसंबंधेनसाध्यसमानाधिकरणत्वेसतीत्यनेनैवविशेषणीयत्वात् अतएवोक्तंनिविशतांवावृ
त्तिमत्वंसाध्यसमानाधिकरणत्वंवेतिकेवलान्वयिग्रन्थेदीधितिकृताकेचित्तुनिरुक्तसाध्याभावत्वविशिष्टनिरूपितायाविशेषणतासम्बन्धेनयथो
क्तसम्बन्धेनवानिरवच्छिन्नाधिकरणतातदाश्रयव्यक्त्यवर्त्तमानंहेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्यंतद्धर्मवत्वं
विवक्षितम्॥ धूमवान्वह्नेरित्यादौपर्वतादिनिष्ठवह्न्यधिकरणत्वस्यव्यक्तेर्धूमाभावाधिकरणावृत्तित्वेपिअयोगोलकनिष्ठवह्न्यधिकरणताव्यक्तेरत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म. ध्यात्वान्नातिव्याप्तिरित्याहुः अन्ये तु हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नसाधिकरणताश्रयवृत्ति यन्निरवच्छिन्नाधिकरणत्वं तद्
४ वृत्तिनिरुक्तसाध्याभावत्वविशिष्टनिरूपितयथोक्तसम्बन्धावच्छिन्नाधिकरणतात्वकत्वमिति विशेषणविशेष्यभावव्यत्यासे तात्पर्यं स्वपदं हेतुपरं
॥ द्रव्यं च कपिसंयोगाभाववान्सत्वादित्यादौ कपिसंयोगिभिन्नं गुणत्वादित्यादावपि नाव्याप्तिरित्याहुरिति संक्षेपः॥ लक्षणान्तरमाह॥ साध्यवद्भिन्नाय
स्साध्याभाववान् तदवृत्तित्वमित्यर्थः कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यकेऽव्याप्तिवारणाय साध्यवद्भिन्नेति साध्याभाववतो विशे
षणमिति प्राञ्चः तदसत् साध्याभाववदित्यस्य व्यर्थत्वापत्तेः साध्यवद्भिन्नावृत्तित्वमित्यस्यैव सम्यक्त्वात्॥ नव्यास्तु साध्यवद्भिन्नेयः साध्याभावस्त
द्वदवृत्तित्वमिति सप्तमीतत्पुरुषोत्तरं मतुप्प्रत्ययः॥ तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः॥ एवं च॥ साध्यवद्भिन्नवृत्तीत्य
नुक्तौ संयोगी द्रव्यत्वादित्यादावव्याप्तिः साध्याभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः तदुपादाने च संयोगवद्भिन्नवृत्तिसंयोगाभावः गुणादिवृत्तिसंयोगाभा
व एव अधिकरणभेदेनाभावभेदात् तद्वद्वृत्तित्वाभावान्नाव्याप्तिः न च तथापि साध्यवद्भिन्नावृत्तित्वमित्येवास्तु किं साध्याभाववदित्यनेनेति वाच्य
म्॥ यथोक्तलक्षणे तस्याप्रवेशेन वैयर्थ्याभावात् तस्यापि लक्षणान्तरत्वात् न च तथापि साध्यवद्भिन्नवृत्तिर्यस्तद्वदवृत्तित्वमेवास्तु किं साध्याभावप
देनेति वाच्यम्॥ तादृशद्रव्यत्वादिमद्वृत्तित्वादसंभवापत्तेः साध्याभावे सन्नसाध्यपदमत्यत एव द्रव्यत्वादेरपि द्रव्यत्वाभावाभावत्वाद्भावरूपाभाव
स्य चाधिकरणभेदेन भेदाभावात्॥ ननु घटाकाशसंयोगघटत्वान्यतराभाववान् गगनत्वादित्यत्र घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगा
भावस्य गगने सत्वाद्धेतुत्वादव्याप्तिः साध्यवद्भिन्ने घटे वर्त्तमानस्य साध्याभावस्य घटाकाशसंयोगान्यतरस्वरूपस्य गगनेऽपि सत्वात्तत्र च हेतोर्वृत्तेः
॥ न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभावत्वं विवक्षितमिति वाच्यम्॥ साध्याभावपदवैयर्थ्यापत्तेः साध्यवद्भिन्नवृत्तित्वविशिष्टवदवृत्तित्वस्यैव राम:
सम्यक्त्वादिति चेन्न अभावाभावस्यातिरिक्तत्वमते नैतल्लक्षणकरणात्॥ तथा चाधिकरणभेदेनाभावभेदात्साध्यवद्भिन्ने घटे वर्त्तमानस्य साध्याभावस्य ४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतियोगिव्यधिकरणस्यप्रतियोगिमतिगगनेऽसत्त्वाद्व्याप्तेरभावात्॥नचैवंसाध्याभावेत्यत्रसाध्यपदवैयर्थ्यंअभावाभावस्यातिरिक्तत्वेतद्द्र
व्यत्वादेरभावाभावत्वात्साध्यवद्भिन्नवृत्तिघटाभावादेस्तुहेतुमत्यसत्त्वादधिकरणभेदेनाभावभेदादितिवाच्यम्॥यत्रप्रतियोगिसमानाधि
करणत्वप्रतियोगिव्यधिकरणत्वलक्षणविरुद्धधर्माध्यासस्तत्रैवाधिकरणभेदेनाभावभेदाभ्युपगमोनतुसर्वत्रतथाचसाध्यवद्भिन्नवृत्तिघटा
भावादेर्हेतुमत्यपिसत्त्वादसम्भववारणायसाध्यपदोपादानात्॥यद्वाघटत्वघटाकाशसंयोगान्यतराभावाभावोतिरिक्तः घटाकाशसंयोगघट
त्वादीनामननुगततयातथात्वस्यवक्तुमशक्यत्वात्घटत्वद्रव्यत्वाद्यभावाभावस्तुनातिरिक्तः घटत्वद्रव्यत्वादीनामप्यनुगतत्वात्॥तथाचद्रव्य
त्वादिकमादायासम्भववारणायैवसाध्यपदमित्यन्यत्रविस्तरः॥साध्यवत्प्रतियोगिकान्योन्याभावेति हेतौसाध्यवत्प्रतियोगिकान्योन्याभावाधि
करणवृत्तित्वाभाववत्त्वमर्थः॥अन्योन्याभावश्च॥प्रतियोग्यवृत्तित्वेनविशेषणीयः तेनसाध्यवतोव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्या
भाववतिहेतौवृत्तावपिनासम्भवः नन्वेवमपिनानाधिकरणसाध्यकेवह्निमान्धूमादित्यादौसाध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियो
गिताकान्योन्याभाववतिहेतोर्वृत्तेरव्याप्तिर्दुर्वाराप्रतियोग्यवृत्तित्वमपहायसाध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणेतुपंचमेन
सहपौनरुक्त्यमितिचेन्न॥वक्ष्यमाणकेवलान्वय्यव्याप्तिवदस्याप्यत्रदोषत्वात्॥नचतथापिसाध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैवतल्लक्षणघ
टकत्वेवक्ष्यमाणकेवलान्वय्यव्याप्तिरत्रासंगताकेवलान्वयिसाध्यकेपिसाध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नान्योन्याभावस्यप्रसिद्धत्वादि
तिवाच्यम्॥तत्रापितादृशान्योन्याभावस्यप्रसिद्धत्वेपितद्वतिहेतोर्वृत्तेरेवाव्याप्तेर्दुर्वारत्वात्॥यद्वासाध्यवत्प्रतियोगिकान्योन्याभावपदेनसाध्यव
त्त्वावच्छिन्नप्रतियोगिकान्योन्याभावएवविवक्षितः नचैवंपंचमाभेदः तत्रसाध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाववत्त्वेनप्रवेशोऽत्रतुतादृशा
धिकरणत्वेनेतिअधिकरणत्वप्रवेशाप्रवेशाभ्यामेवभेदात्अखण्डाभावघटकतयाचनाधिकरणत्वांशस्यात्रवैयर्थ्यमितिनकोपिदोषइतिदिक्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म० सकलेति साकल्यं साध्याभाववतो विशेषणम् तथाच॥ यावन्ति साध्याभावाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतोर्व्याप्तिरित्यर्थः धूमाद्यभा
५ ववद्ध्रदादिनिष्ठाभावप्रतियोगित्वाद्वह्न्यादेरतिव्याप्तिरिति॥ यावदिति साध्याभाववतो विशेषणम् साध्याभावविशेषणत्वे तत्तद्ध्रदाद्यवृत्तित्वा
दिरूपेण यावद्वह्न्यभावस्तस्यापि सकलमध्यप्रवेशात्तावदधिकरणाप्रसिद्ध्याऽसम्भवापत्तेः॥ नच द्रव्यत्वं सत्त्वादित्यादौ द्रव्यत्वाभाववति गुणादौ सत्त्वाद
विशिष्टाभावादिसत्त्वादतिव्याप्तिरिति वाच्यम्॥ तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वस्यैव विवक्षितत्वात्॥ प्रतियोगिता च हेतु
तावच्छेदकसम्बन्धेन विवक्षणीया॥ तेन द्रव्यत्वाद्यभाववति गुणादौ सत्त्वादेः संयोगादिसम्बन्धावच्छिन्नाभावसत्त्वेऽपि नातिव्याप्तिः साध्याभाव
श्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः अन्यथा पर्वतादेरपि वह्न्यादेर्विशिष्टाभावादिसत्त्वेन सम
वायादिसम्बन्धावच्छिन्नवह्न्यादिसामान्याभाववत्त्वेन च यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावाद्धूमस्यासम्भवात् नच कपिसंयोगे
तद्वृक्षत्वादित्यादौ वृक्षस्यापि तादृशसाध्याभाववत्त्वेन यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावादेतद्वृक्षत्वस्याव्याप्तिरिति वाच्यम्॥
किंचिदनवच्छिन्नायास्साध्याभावाधिकरणताया इह विवक्षितत्वात् इत्थं च किंचिदनवच्छिन्नायाः कपिसंयोगाभावाधिकरणताया गुणादावे
व सत्त्वात्तत्र हेतोरप्यभावसत्त्वान्नाव्याप्तिः॥ नच कपिसंयोगाभाववान्सत्त्वादित्यादौ साध्याभावस्य कपिसंयोगादेर्निरवच्छिन्नाधिकरणत्वाप्रसि
द्ध्याऽव्याप्तिरिति वाच्यम् केवलान्वयिन्यभावादित्यनेन ग्रन्थकृतैवास्य दोषस्य वक्ष्यमाणत्वात्॥ नच पृथिवी कपिसंयोगादित्यादौ पृथिवीत्वाभाव
वति यावत्स्वेव कपिसंयोगाभावसत्त्वादतिव्याप्तिरिति वाच्यम्॥ तन्निष्ठपदेन तत्र निरवच्छिन्नवृत्तिमत्त्वस्य विवक्षितत्वात् इत्थं च पृथिवीत्वा
भावाधिकरणे जलादौ यावदन्तर्गते निरवच्छिन्नवृत्तिमानभावो न कपिसंयोगाभावः किन्तु घटत्वाद्यभाव एव तत्प्रतियोगित्वस्य हेतावसत्त्वा राम०
न्नातिव्याप्तिः नचैवमन्योन्याभावस्याव्याप्यवृत्तितानियमनये द्रव्यत्वाभाववान्संयोगवद्भिन्नत्वादित्यादेरपि सद्धेतुतयाऽव्याप्तिः संयोगवद्भिन्नत्वा ५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भावस्यसंयोगस्यनिरवच्छिन्नवृत्तेरप्रसिद्धेरितिवाच्यम्॥अन्योन्याभावस्याव्याप्यवृत्तितानियमनयेऽन्योन्याभावस्याभावोनप्रतियोगितावच्छेद
करूपःकिन्त्वतिरिक्तोऽव्याप्यवृत्तिरन्यथामूलावच्छेदेनकपिसंयोगिभेदाभावभानानुपपत्तेरितिसंयोगवद्भिन्नत्वाभावस्यापिनिरवच्छिन्नवृत्ति
मत्वात्॥वस्तुतस्तुसकलपदमत्राशेषपरंएतद्घटत्वाभाववान्पटत्वादित्याद्येकव्यक्तिपक्षकेसाध्याभावाधिकरणस्ययावत्त्वाप्रसिद्ध्याऽव्याप्त्यापत्तेः
तथाचकिंचिदनवच्छिन्नायानिरुक्तसाध्याभावाधिकरणतायाव्यापकीभूतोयोऽभावः हेतुतावच्छेदकसम्बन्धावच्छिन्नतत्प्रतियोगितावच्छेद
कहेतुतावच्छेदकवत्त्वंलक्षणार्थः नचसत्तादिसामान्याभावस्यापिप्रमेयत्वादिनानिरुक्तसाध्याभावाधिकरणताव्यापकत्वाद्द्रव्यंसत्त्वादित्यादाव
तिव्याप्तिः तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वंव्यापकत्वमित्युक्तौतुनिर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादावव्याप्तिःनिर्वह्नित्वाभावा
नांवह्निव्यक्तीनांसर्वासामेवचालनीन्यायेननिर्धूमत्वाभावाधिकरणतावन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वादितिवाच्यम्॥तादृशाधिक
रणताव्यापकतावच्छेदकंहेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वंतद्धर्मवत्त्वस्यविवक्षितत्वात्व्यापकतावच्छेदकत्वंतुतद्वन्नि
ष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वम्वाप्रकृतव्यापकतायांप्रतियोगिवैयधिकरण्यस्यनिरवच्छिन्नत्वस्यवाप्रवेशेप्रयोजनविरहात्तेनपृथि
वीसंयोगादित्यादौनातिव्याप्तिःकपिसंयोगाभावत्वस्यनिरुक्तव्यापकतानवच्छेदकत्वादित्येवपरमार्थः॥साध्यवदन्येति॥अत्रापिप्रथमलक्षणो
क्तरीत्याहेतौसाध्यवदन्यवृत्तित्वस्याभावइत्यर्थः तादृशवृत्तित्वाभावश्चतादृशवृत्तित्वसामान्याभावोबोध्यः तेनधूमवान्वह्नेरित्यादौधूमवदन्य
जलह्रदादिवृत्तित्वाभावस्यधूमवदन्यवृत्तित्वजलत्वोभयाभावस्यचहेतौसत्त्वेपिनातिव्याप्तिःसाध्यवदन्यत्वंचान्योन्याभावत्वनिरूपितसाध्यव
त्त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वंतेनवह्निमान्धूमादित्यादौतत्तद्वह्निमदन्यस्मिन्धूमादेर्वृत्तावपिनाव्याप्तिर्नेवावह्निमत्त्वावच्छिन्नप्रति
योगिताकात्यंताभावस्यस्वावच्छिन्नभिन्नभेदरूपस्याधिकरणेपर्वतादौधूमस्यवृत्तावप्यव्याप्तिःतस्यास्साध्यवत्त्वावच्छिन्नप्रतियोगिताअसंता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प. ६ भावत्वनिरूपितत्वेनान्योन्याभावत्वनिरूपितत्वविरहात्॥ अन्योन्याभावत्वनिरूपितत्वं च तादात्म्यसम्बन्धावच्छिन्नत्वमेव साध्यत्वं च साध्य
तावच्छेदकसंबन्धेन बोध्यम्॥ तेन वह्निमान्धूमादित्यादौ वह्निमत्वावच्छिन्नप्रतियोगिताकस्य समवायेन वह्निमतोऽन्योन्याभावस्याधिकरणे ध
र्वंसादौ धूमादेर्वृत्तावपि नाव्याप्तिः सर्वमन्यत्प्रथमलक्षणोक्तदिशावसेयम्॥ यथा तु न तृतीयलक्षणाभेदस्तथोक्तं तत्रैवेति समासः सर्वाण्येव लक्ष
णानि केवलान्वय्यव्याप्यादूषयति केवलान्वय्यभावादिति पंचानामेव लक्षणानामिदं वाच्यं ज्ञेयत्वादित्यादिव्याप्यवृत्तिकेवलान्वयिसाध्यके द्विती
यादिलक्षणचतुष्टयस्य तु कपिसंयोगाभाववान्सत्त्वादित्याद्यव्याप्यवृत्तिकेवलान्वयिसाध्यकेऽपि चाभावादित्यर्थः साध्यतावच्छेदकसंबन्धावच्छि
न्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्य साध्यतावच्छेदकसंबन्धेन साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य चाप्रसि
द्धत्वात् कपिसंयोगाभाववान्सत्त्वादित्यादौ निरवच्छिन्नसाध्याभावत्वस्याप्रसिद्धत्वादिति भावः तृतीयलक्षणस्य केवलान्वयिसाध्यकासत्त्वं
च तद्व्याख्यानावसर एव प्रपंचितं एतच्चोपलक्षणं द्वितीये कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः अधिकरणभेदेनाभावभेदमानाभावेन क
पिसंयोगवद्भिन्नवृत्तिकपिसंयोगाभावो द्रव्यवृत्तिकपिसंयोगाभाव एव तद्वृत्तित्वादेतद्वृक्षत्वस्य तृतीये साध्यवत्प्रतियोगिकान्योन्याभावसामा
न्यस्य घटकत्वे चालनीन्यायेनान्योन्याभावमादाय नानाधिकरणसाध्यके वन्हिमान्धूमादित्यादावव्याप्तिश्चेत्यपि बोध्यम्॥ ॥इति व्याप्तिपं
चकरहस्यम्॥ समाप्तोऽयं व्याप्तिपंचकग्रंथः॥ माथुरीपंचलक्षणी समाप्ता॥

॥ अथ सिंहव्याघ्रचिंतामणिः॥

॥ श्रीगणेशाय नमः॥ नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधिकरण्यानधिकरणत्वं वा तदुभयमपि साध्यानधिकरणानधि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करणत्वं तच्च तन्न यत्किंचित्साध्यानधिकरणानधिकरणे धूमे चाप्रसिद्धमिति॥ नापीति॥ अत्र साध्यस्यासामानाधिकरण्यं न साध्याधिकर-
णवृत्तित्वाभावः॥ द्रव्यं सत्त्वादित्यादावतिव्याप्त्यापत्तेः द्रव्यत्वाधिकरणवृत्तित्वाभाववानधिकरणत्वात् सत्तायां नापि साध्यवद्भिन्नवृत्तित्वं द्विती-
येन पुनरुक्त्यापत्तेः किंतु साध्याधिकरणत्वाभाववद्वृत्तित्वं तदनधिकरणत्वं च तद्भिन्नत्वं अधिकरणत्वप्रवेशप्रयोजनविरहात् तथा च साध्या-
धिकरणत्वाभाववद्वृत्तिभिन्नत्वं हेतोरव्यभिचरितत्वमिति फलितं अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणायाधिकरणत्वप्रवेशः अव्याप्यवृ-
त्तेरधिकरणतानुनाव्याप्यवृत्तिः साध्याधिकरणत्वं च साध्यतावच्छेदकावच्छिन्नं साध्यतावच्छेदकसम्बन्धावच्छिन्नं च ग्राह्यं अन्यथा गुणकर्मा-
न्यत्वविशिष्टसत्तावान् जातेरित्यादौ सत्ताया एव साध्यत्वेन साध्याधिकरणत्वाभाववत्सामान्याद्येव तद्वृत्तित्वाज्जातेरिति व्याप्तिः स्यात् सा च समवाये-
न वह्न्यादौ साध्ये संयोगेन धूमादिहेतावतिव्याप्तिः वह्न्यधिकरणत्वाभाववज्जलह्रदाद्येव तद्वृत्तित्वाद्धूमादेः इत्थं च साध्यतावच्छेदकविशिष्ट-
सत्तात्वावच्छिन्नसाध्याधिकरणत्वाभाववद्गुणादि तद्वृत्तित्वाज्जातेः साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्नवह्न्यधिकरणत्वाभाववत्सर्वं तावद-
पि धूमस्य तद्वृत्तित्वान्नातिव्याप्तिः वृत्तिश्च हेतुतावच्छेदकसम्बन्धेन बोध्या॥ तेन तादृशवह्न्यधिकरणत्वाभाववति धूमावयवे समवायेन धूमस्य वृत्त-
त्वेपि न क्षतिः नचैवं सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः सत्ताधिकरणत्वाभाववति सामान्यादौ हेतुतावच्छेदकसमवायसम्बन्धेन वृत्तेरेवाप्रसिद्धेरि-
ति वाच्यम्॥ तादृशसाध्याधिकरणत्वाभावव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमिति विवक्षितत्वात् साध्याधिकरणत्वाभावसामानाधिकरण्ये-
त्युक्तौ धूमवान्वह्नेरित्यादौ धूमाधिकरणत्वाभाववति जलह्रदादौ वह्निमदन्योन्याभावसत्त्वादतिव्याप्तिरतो व्यापकत्वानुधावनं अन्योन्याभावप्रतियोगि-
तावच्छेदकत्वं हेतुतावच्छेदकसम्बन्धावच्छिन्नं हेतुतावच्छेदकावच्छिन्नं च ग्राह्यं अन्यथा वह्निमान् धूमादित्यादौ वह्न्यधिकरणत्वाभाववति धूमावय-
वे धूमवदन्योन्याभावासत्त्वादव्याप्तिः स्यात्॥ स्याच्च द्रव्यं जातेरित्यादौ घटत्वपटत्वादितत्तज्जातिमतोन्योन्याभावस्य द्रव्यत्वाधिकरणत्वाभाव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म॰ व्यापकत्वे नातिव्याप्तिः अव्याप्यवृत्तिमतोऽन्योन्याभाववस्तुनाव्याप्यवृत्तिरितिपृथिवीसंयोगादित्याद्यव्याप्यवृत्तिहेतुकेव्यभिचारिणिनातिव्या
७ प्तिरितिसंक्षेपः॥ इतिप्रथमलक्षणंसमाप्तं॥ साध्यवैयधिकरण्यमिति साध्यवैयधिकरण्यंसाध्यवद्भिन्नवृत्तित्वंसाध्यवदवृत्तित्वपरत्वेद्रव्यत्वस
त्वादित्यादावतिव्याप्तिः अव्याप्यवृत्तिमतोऽन्योन्याभाववस्तुनाव्याप्यवृत्तिरित्यव्याप्यवृत्तिसाध्यकसद्धेतौनाव्याप्तिः अनधिकरणत्वमित्यत्राधिकरण
त्वांशस्याधिकस्यप्रवेशान्नसाध्यवदव्यावृत्तित्वमित्यनेनयथाश्रुतस्यपौनरुक्त्यंअखण्डाभावघटकतयाचाधिकरणत्वांशस्यनैवमर्थं साध्यवद्भि
न्नत्वंचसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकंबोध्यम् तेनवह्निमान्धूमादित्यादौधू
मस्यसमवायेनवह्निमतोभिन्नेयत्किंचित्साध्यवह्निव्यक्तिभिन्नेचपर्वतादौवृत्तित्वेपिनक्षतिः तादृशसाध्यवद्भिन्नत्वव्यापकान्योन्याभावप्र
तियोगितावच्छेदकत्वमितितुसमुदायार्थनिष्कर्षः अन्यथापूर्ववत्साध्यवद्भिन्नवृत्तिकत्वमित्यत्रवृत्तेहेतुतावच्छेदकसम्बन्धेनैववाच्यतया
सत्तावान्द्रव्यत्वादित्यादावव्याप्त्यापत्तेः शेषंपूर्ववत् लक्षणद्वयमेकदैवदूषयति॥ तदुभयमपीति॥ साध्यानधिकरणानधिकरणत्वंसाध्या
नधिकरणानधिकरणत्वनियतंसाध्यानधिकरणावृत्तित्वव्याप्यमितियावत् तच्चव्यापकीभूतसाध्यानधिकरणावृत्तित्वंच तत्रकेवलान्वयि
साध्यकेऽप्रसिद्धमित्यन्वयः साध्यानधिकरणत्वस्यसाध्याधिकरणत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वस्यतत्राप्रसिद्धेः यत्किंचिदितियदिचसा
ध्यानधिकरणत्वंनतत्सामान्यभेदः किन्तुसाध्याधिकरणप्रतियोगिताकभेदवत्त्वमात्रं तदावह्निमान्धूमादित्यत्रयत्किंचिद्वह्न्यनधिकरणेपर्वता
दौवर्त्तमानेधूमेप्यप्रसिद्धमित्यर्थः अप्यर्थकचकारात्केवलान्वयिसाध्यकसमुच्चयः॥ तथाचव्यापकाभावाद्व्याप्याभूतंतदुभयलक्षणमपितदुभय
त्राप्रसिद्धमितिभावः साध्यानधिकरणानधिकरणत्वमिति यथाश्रुतंतुनसंगच्छते यथोक्तलक्षणद्वयस्यतत्स्वरूपत्वाभावादितिध्येयम् भट्टाचा रामः
र्यानुयायिनस्तु तदुभयमपितदुभयलक्षणवाक्यमपि साध्यानधिकरणानधिकरणत्वंसाध्यानधिकरणानधिकरणत्वबोधजनकं साध्याधिक ७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रणत्वसामान्याभाववद्वृत्तित्वाभावसाध्यवत् सामान्यभिन्नवृत्तित्वाभावान्यतरबोधजनकमितियावत्॥ तच्चतादृशान्यतराभाववत्वंच तत्रकेव
लान्वयिसाध्यकेऽप्रसिद्धमित्यन्वयः साध्याधिकरणत्वसामान्याभावादेरप्रसिद्धत्वादितिभावः॥ ननुतदुभयवाक्यंन प्रागुक्ताभावान्यतरविष
यकबोधजनकमपिसाध्याधिकरणत्वप्रतियोगिकाभाववद्वृत्तित्वसामान्याभावसाध्यवत् प्रतियोगिकभेदवद्वृत्तित्वसामान्याभावान्यतरबोध
जनकमेव साध्याधिकरणत्वप्रतियोगिकाभावसाध्यवत्प्रतियोगिकभेदौचकेवलान्वयिन्यपिप्रसिद्धावित्यत आह॥ यत्किंचिदिति॥ शेषंपू
र्ववदित्याहुः॥ ॥ इतिशशिधरमणिधरलक्षणव्याख्या॥ समाप्तौसिंहव्याघ्रौ ॥

वाराणसीप्रसादस्यनियोगेनतुयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयंविलासरैः॥१॥ श्रीकाशीजीमेमहल्लेहौदकटोराश्रीबाबूवाराण
सीप्रसादजीकेमकानमेकाशीसंस्कृतमुद्रायंत्रमेछपीजिनकोलेनाहोयउनकोश्रीबाबूवाराणसीप्रसादजीकेपासयाकचौरीगलीमेंभाईप्र
तापसिंहजीकेदुकानपरमिलेगी संवत् १९४१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

128

॥ इतिसिंहव्याघ्रसहितामायूरीपञ्चलक्षणीसमाप्ता ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri